११२३
23/8

॥इतिसौश्रुतसूत्रस्थानंप्रथमंपूर्णं१॥

Iti Sausra Sutram Sthanam
prathama purna

23/8

२३
१११

कुटिः क्षीरखु विषजुष्टणं ।। ज्ञात्वा श्रीवो तिवेतस्य वसनीच ह्ली सली ।। रसनो चन्नवेद्कार्श्यपर्शते चौं जशांतले
ौगविश्वेषणीं कुर्याद्दन्तदोहोन्नवन्महान् ।। निर्धेनमनरलं तस्ये दिवो दासेन नाषिते ।। 2318

त्यक्तविषं सह यंतिये। तत्रैव ते विनश्यंति मक्षिका वायसादयः हुतभुक् तेन चात्येन स्फुटन् नट वटा। यते मयूरकंठप्रतिमो जायते चापि दूःसहः। भि
न्नार्चिः तीक्ष्णधूमश्च नचिराच्चोपशाम्यति चकोरस्याक्षिवैराग्यं जायते क्षिप्रमेव तु। दृष्ट्वान्नं विषसंसृष्टं म्रियते जीवजीवकः कोकिलः स्वरवै
॥२॥ कृत्यं क्रौंचस्तु मदमृच्छति। हृष्येन्मयूर उद्विग्नः क्रोशतः शुकसारिके हंसः क्ष्वेडति चात्यर्थं भृंगराजस्तु कूजति। पृषतो विसृजत्यश्रु विष्ठां मुंचति
मर्कटः संनिकृष्टांस्ततः कुर्यात्तात्तान्नृपगृहे गुणः। वेश्म तोयाद्विभूषार्थं रक्षार्थं चात्मनः सदा। उपहितस्य वान्नस्य बाष्पेणोर्ध्वं प्रसर्प
ता हृत्पीडा भ्रांतनेत्रत्वं शिरोदुःखं च जायते। तत्र नस्यांजने कुष्ठं लामज्जं नलदं मधु। कुर्यात् शिरीषरजनीचंदनैश्च प्रलेपनं हृदि चंदनले
पश्च तथा सुखमवाप्नुयात्। पाणिप्राप्तं पाणिदाहं नखशातं करोति च। तत्र प्रलेपः श्यामेंद्रगोपसोमोत्पलानि च। सर्वेषु मासात्मोहाद्या ॥२॥
तत्रानुपसेवनेऽप्युष्ठीलावनेतोजिह्वा भवत्यरसवेदिनी तुद्यते दह्यते चापि श्लेष्मा चास्य प्रसिच्यते। तत्र वाष्पेरितं कर्म यच्चास्या दंतकाष्ठ
कं मूर्च्छा छर्दिरतीसारो मांद्याग्नेर्दाहवेपथुः इन्द्रियाणां च वैकृत्यं कुर्यादामाशयं गतं। तत्राशु पदना लाबुर्वि विक्रोशातकी फलैः छर्द
नं दध्नु दश्विस्रांम यवानं तुलां बुना। दाहमूर्च्छा मतीसारं तृष्णामिंद्रियवैकृतं। आटोपं पांडुतां कार्श्यं कुर्यात्पक्वाशयं गतं। विरेचनं
ससर्पिष्कं तत्रोक्तं नीलिनीफलं। दूषीविषारिश्च पेयो वा मधुसंयुतं। द्रवद्रव्येषु सर्वेषु क्षीरमद्योदकादिषु। भवंति विविधा राजः फेन
बुद्बुदजन्मवा। छायाश्चात्र न दृश्यंते दृश्यंते मदि वा पुनः। भवंति यमला छिद्रा स्त्र— वा विकृतास्तथा। शाकसूपान्नमांसानि क्लिन्नानि राम
विरसानि च सद्यः पर्युषितानीव विगंधानि भवंति हि। गंधवर्णरसैर्हीनाः सर्वे नित्याः फलानि च। पक्वान्याशु विशीर्यंते पक्वमामानि या

दस्तनावन्ना स्पाबुम मनें चाति शि धूधुका ... दाहो
मवे ... स्पर्श विभिं तस्य कुरुते ।।

पकल्पस्थानंपंचमं

स्ववित्तकुलीनंधार्मिकंस्निग्धंसभृत्यंसततोत्थितं।अलु–मशठंभक्तंकृतज्ञंप्रियदर्शनं।क्रोधपारुष्यमात्सर्यमदालस्यविवर्जितं॥जितें
द्रियंक्षमावंतंशीलसौचदयान्वितं।मेधाविनयसंश्रांतमनुरक्तंहितैषिणं।पटुंप्रगल्भंनिपुणंदक्षंपैशुन्यवर्जितं।पूर्वोक्तैश्चगुणैर्युक्तंनि
त्यंसंनिहितागदं।महानसेनियुंजीतवैद्यंतद्विद्यपूजितं।प्रशस्तदिग्देशकृतंशुचिभांडंनिवेशितं।सजालकगवाक्षाद्यमाप्तवर्गनिषेवितं।वि
कक्षंविमृष्टसंसृष्टंसवितानंकृतार्चनं।परीक्षितस्त्रीपुरुषंभवेच्चैवमहानसं।तत्राध्यक्षंनियुंजीतप्रायोवैद्यगुणान्वितं।शुचयोदक्षिणाःदक्षा
विनीताःप्रियदर्शनाः।संविभक्ताःसुमनसोनीचकेशनखाःस्थिराः।स्नाताःदृढंसंयमिनः।कृतोष्णीषाःसुसंयताः।तस्यचाज्ञाविधेयाःस्युःविविधाः
परिकर्मिणः।आहारस्थितयश्चापिभवंतिप्राणिनोयतः।तस्मान्महानसेवैद्यःप्रमादरहितोभवेत्।महानसस्यवोढारस्सूपौदनिकपौपि
काः।भवेयुर्वैद्यवशगायेचाप्यन्येत्रकेचन।इंगितज्ञोमनुष्याणांवाक्चेष्टामुखवैकृतैः।विंद्याद्विषस्यदातारमेभिर्लिंगैश्चबुद्धिमान्।नददा
त्युत्तरंपृष्टोविवक्षुर्मोहमेतिच।अपार्थंबहुसंकीर्णंभाषतेचापिमूढवत्।स्फोटयत्यंगुलीर्भूमिमकस्माद्विलिखेद्धसेत्।वेपथुर्जायतेचास
त्रस्तःचान्योन्यमीक्षतेदीनोविवर्णवक्त्रश्चनखैःकिंचिच्छिनत्त्यपि।आलभेतासकृद्दीनःकरेणचशिरोरुहान्।निर्यियासुरपद्वारंवीक्षतेपुनः
२ वर्ततेविपरीतंचविषदाताविचेतसः।केचित्समर्थाःपार्थिवस्यत्वरितंवातदाज्ञया।असतामपिसंतोपिविष्टाःकुर्वंतिमानवाः।तस्मात्परीक्षणं
कार्यंस्यात्तानामाहतैर्नृपैः।अन्नेपानेदंतकाष्ठेतथाभ्यंगेचलेखने।उत्सादनेपरीषेकेकषायेसानुलेपने।स्रग्वस्त्रेषुशय्यासुकवचाभरणेषु।
पादुकापादपीठेषुपृष्ठेषुगजवाजिनां।विषजुष्टेषुचान्येषुनस्येधूमांजनादिषु।लक्षणानिप्रवक्ष्यामिचिकित्सामप्यनंतरं।नृपजनकाद्यलिम्य

निवा। विचीर्यते रूर्वकस्तु दंतकाष्टगते विषे। जिह्वा दंतौष्टमांसानि। श्वयथुश्चोपजायते अथास्य धातकीपुष्पपथ्याजंबुफलास्थिभिः। सक्षौ
द्रैः मक्षिते रोगे पूर्वकर्तव्यं प्रतिसारणं अथवा कोटसूलानिलवः। समसूक्ष्मरजस्वा। शिरीषमासेकावापित्वक्षौद्रैः प्रतिसारणं। जिह्वां निर्लेख्य कवलो
दंतकाष्टवदादिशेत्। पिच्छिलो बहलो ऽभ्यंगो विवर्णो वा विषान्वितः स्फोटजन्मरुजास्रावबलरूपाकाः स्वेदनं ज्वरः। दरणं वापि मांसानां मत्स्यंगे वि
षसंयुते तत्र शीतांबुसिक्तस्य कर्तव्यमनुलेपनं चंदनं तगरं कुष्टं उशीरं वेणुपत्रिका सोमवल्यमृतो श्वेता पद्मकालीयकं तथा। कपित्थरसमूत्राभ्यां
पानेनसंयुज्यते उत्सादने परीषेके कषाये चानुलेपने राप्यावक्त्र तत्तु नेत्रेषु त्तेयमत्संगलक्षणैः केशशातं शिरोदुःखं खेभ्यश्च रुधिरागमः ग्रंथि
जन्मोत्तमांगे च विषजुष्टे च लेपने तत्र मूलेपो वकुशोभा विताहलस्मृत्तिका रिक्तापिपित्रस्रतष्ट्यामापालिंदीतंदुलीयकैः गोमयस्वरसो वापि
हितो वा मालतीरसः। रसो हुषरूपण्णो वा धूमो वांगारसन्निभः शिरोऽभ्यंगविरक्षाणं — नस्तु लीषमेव च व्रजस्य विषसंसृष्टा सा रुपे दयले
खनात्। मुखालेपस्तु खरपामंत्तेयमत्संगलक्षणैः पद्मिनीकंटकं कर्षवैकंटकं श्चोपनीयते तत्र क्षौद्रपृष्टं तपानं मालेपश्च दर्नं द्रष्टं तपयस्पा
मधुकं फंजीवं पुंजीवपुनर्नवाः। अस्वास्थ्यं कुंजरादीनां लालास्रावो ऽधिरक्तता। स्फिक्त वायुमेदूस्त्वक्षु जानुषु स्फोटसंभवाः। तत्राभ्यंगवदाव
ष्टमानवा हन्नम्यो: क्रिमयो ऽन्तागमनरवभ्यः शिरोरुक् कफसंस्रवः। नस्यधूमगते लिंगं। इंद्रियाणां च वैकृतं तत्र दुग्धैर्गवादीनां सर्पिः सान्निवि
षस्रतं। पानेनस्ये समस्वेतं हितं समरयंति गंधहानि विवर्णत्वं पुष्पाणां म्लानता न वेत् जिघ्रतश्च शिरोदुःखं वारिपूर्णे वलोचने तत्र वाष्परितंकर्म

मुखालेपेचयत्स्मृतं।कर्णेतैलगतेश्रोत्रवैगुण्यंशोफवेदने।कर्णेआवस्थुतत्राशुकर्त्तव्यंतत्रपूरणंस्वरसोबहुपुत्रायाःसघृतःक्षौद्रसंयुतः
सोमवल्करसश्चापिसुशीतोहितमिष्यते।अक्ष्णोर्दाहश्चवेदनादृष्टिविभ्रमः।अंजनेविषसंसृष्टेभवेदांध्यमथापिवा।तत्रसद्योघृतंदेयंतर्पणंच
॥३॥ समागधं।अंजनंमेषशृंगोनिर्यासोवरुणस्यच।मुष्ककस्याजकर्णस्यफेनोगोपित्तसंयुतः।कपित्थमेषशृंग्योश्चपुष्पंभल्लातकस्यच।एकैकंका
रयेत्पुष्पंबंधूकांकोटयोरपि।शोफःस्रावस्त्वचांस्वापःपादयोस्फोटजन्मच।भवंतिविषजुष्टाभ्यांपादुकाभ्यामसंशयं।उपानत्पादपीठेषुपादुका
भांञ्वसाधयेत्भूषणानिहतार्चीषिनहिभांतियथापुरा।स्थानस्थानानिहन्युश्चदाहपाकावदारणैः।पादुकादूषणैर्युक्तंसमभंगादिविधिमाचरेत्
विषोपसर्गेवाप्यादिदूषणंतोममिरितः।उपद्रवास्त्वस्पृवाद्यवविदधीतचिकित्सितं।महासुगंधिमगदंयंचवक्ष्यामितंभिषकू।पानालेपननस्येषु
विदधीतांजनेषुच।विरेचनानितीक्ष्णानिकुर्यात्छर्दनानिच।शिरांचव्यधयेत्क्षिप्रंप्राप्तंविस्रावणंयदि।दूषिकांजंतुहत्वापिहन्तेवक्तु ॥३॥
भूपतेः।करोतिनिर्विषंसर्वमन्नंविषसमायुतं।हृदयावरणंनित्यंकुर्यात्सोमित्रमध्यगः।पिबेद्घृतमजेयाख्यममृताख्यंचवत्सकंवत्।सर्पि
र्दधिपयःक्षौद्रंपिबेद्वाशीतलंजलं।मयूरान्नकुलान्गोधाःपृषतान्हरिणानपि।भक्षयेच्चापिसततंरसांस्तेषांपिबेद्दधि।गोधानकुलमां
सेषुहरिणस्यचबुद्धिमान्।दद्यात्तुपिष्टांपालिंदीमधुरांशर्करांबुना।शर्करातिविषेदेयामाधूरेसमहौषधे।पार्वतीवापिदेयास्युःपिप्पल्यःस
महौषधाःसक्षौद्रःसघृतश्चैवनिंबयूषोहितःसदा।विषघ्नानिचसंसेवेतमन्त्रेणोक्तान्यानिबुद्धिमान्।।पिप्पलीमधुकंक्षौद्रंशर्करेक्षुरसांबुभिः राम
छर्दयेत्तुमहत्स्वंशाम्भीयाद्यदिचेद्विषं॥ ॥इतिकल्पेप्रथमोध्यायः॥ ॥अथातस्थावरविषविज्ञानीयमध्यायंव्या०॥स्थावरंजंगमंचैवद्विविधंवि

प्रमुच्यते दशाधिष्ठानमाद्यंतु द्वितीयं षोडशाश्रयं। मूलं पत्रं फलं पुष्पं त्वक् क्षीरं सार एव च निर्यासो धातवश्चैव कंदश्च दशमस्मृतः तत्र क्लीत
काश्वमारकगुंजासुगंधकगर्गरककरघाटविद्युच्छिखविजयानीत्यष्टौ मूलविषाणि। विषपत्रिकालंबवरदारुककरंभमहाकरंभाणि पंचप
त्रविषाणि ककर्कोटकरेणुकखद्योतचर्मरीयमागधकुमुद्वतीरेणुकाकुरंटकसर्वधातिनंदकसारकाश्रकोल्लसारपाकानि तिद्वादशफल
विषाणि वेत्रकादंबवल्लिजकरंभमहाकरंभाणि पंचपुष्पविषाणि अंत्रयः पाचनकर्त्तरीयवल्लिजसैरेयककरघाटकरंभकंदननाराचकानिचस
प्तत्वक्सारनिर्यासविषाणि कुमुदघ्नीस्नुहीजालक्षीरीणि त्रीणि क्षीरविषाणि फेणाश्मभस्महरितालं च द्वे धातुविषे कालकूटवत्सनाभसर्ष
पकपालककर्दमकवैराटपुस्तकशृंगीविषप्रपौंडरीकमूलकहालाहलमहाविषकर्कटानि तित्रयोदश कंदविषाणि इत्येवं पंचपंचा
शत्स्थावरविषाणि भवंति। चत्वारि वत्सनाभानि मुस्तके द्वे प्रकीर्तिते षट् चैव सर्षपाण्याहुः शेषाण्येकैकमेव च। उद्वेष्टनं मूलविषैः
प्रलापो मोह एव च। जृंभणं वेपथुः श्वासो ज्ञेयाः पत्रविषेण तु मुष्कशोफः फलविषैर्दाहोऽन्नद्वेष एव च। भवेत्पुष्पविषैश्छर्दिराध्मानं मोह ए
व च। त्वक्सारनिर्यासविषैरुपयुक्तैर्भवंति हि। आस्यदौर्गंध्यपारुष्यशिरोरुक्कफसंस्रवाः फेनागमः क्षीरविषैः विड्भेदो गुरुजिह्वता॥ हृ
त्पीडनं धातुविषैर्मूर्च्छा दाहश्च तालुनि। प्रायेण कालघातीनि विषाण्येतानि निर्दिशेत्। कंदजानि तु तीक्ष्णानि तेषां वक्ष्यामि विस्तरं स्प
र्शाज्ञानं कालकूटे वेपथुः स्तंभ एव च ग्रीवास्तंभो वत्सनाभे पीतविण्मूत्रनेत्रता सार्षपे वातवैगुण्यमानाहो ग्रंथिजन्म च। ग्रीवादौर्बल्यवा
क्संगौ ककालेन भवंति हि। प्रसेकः कर्दमाख्येन विड्भेदः पीतनेत्रता। वैराटकेनांगदुःखं शिरोरोगश्च जायते गात्रस्तंभो वेपथुश्च जायते तुस्त

॥४॥ केनचि शृंगीविषेणांगसादो दाहोदरविद्रधयः पुंडरीकेण रक्तत्वमक्ष्णोः दूषीविषेण पांडुरेवैवर्ण्यं मूलके छर्दिहिक्काशोफप्रमूढताः। रपावि
रेण श्वसितिन सैहालाहलेन वैस्वर्यं महाविषेण हृदयग्रंथिशूलोद्गमौ भृशं। मर्कटेनोत्पतन्नूर्ध्वं हसेद्दंतान् दशत्यपि कंदजान्युग्रवीर्या
णि प्रायुक्तानि त्रयोदश सर्वाण्येतानि कुशलैर्युक्तानि दशभिर्गुणैः रूक्षमुष्णं तथा तीक्ष्णं सूक्ष्ममाशु व्यवायि च विकाशि विशदं चैव लघु
पाकि च तत्स्मृतं। रौक्ष्यात् संकोपयेद्वायुं औष्ण्यात् पित्तं सशोणितं तैक्ष्ण्यान्मनो मोहयति मर्मबंधान् छिनत्ति च। शरीरावयवान् सौक्ष्म्यात् प्रवि
शेद्विकरोति च। आशुत्वादाशु तद्धंति व्यवायात्प्रकृतिं भजेत् विकाशित्वात् सर्पयति दोषान् धातून् मलानपि। वैशद्यादतिरिच्येत दुश्चि
कित्स्यं च लाघवात् दुर्जरं चापि पाकित्वात् तस्मात् क्लेशाय यते--- वरं कृत्रिमं चैव जंगमं वापि यद्विषं सद्यो व्यापादयेत्तत्तु ज्ञेयं दशगु ॥४॥
णान्वितं यत्स्थावरं जंगमं वा कृत्रिमं वा देहादशेषं यदनिर्हृतं तत् जीर्णं विषघ्नौषधिभिर्हतं वा दावाग्निवातातपशोषितं वा स्वभावतो वा
गुणविप्रहीनं विषं हि दूषीविषतामुपैति तत् श्लेष्मणा कोपितमंबुदानां समुद्गये प्राप्ते छिलव विर्यक्षिप्रं सप्तुनि स्तिमितं दभावाद्योनिर्गुण
नां शरीरसंस्थं। वीर्याल्पभावाद्विभावनीयं कफावृतं वर्षगणानुबंधि तेनार्दितो भिन्नपुरीषवर्णो विवर्णवैरस्यमुखः पिपासी मूर्छा भ्र
मो गद्गदवाग्विवर्णो भवेच्च दूष्योदरलिंगजुष्टं आमाशयस्थे कफवातरोगी पक्वाशयस्थेनिलपित्तरोगी भवेन्नरो ध्वस्तशिरोरुहांगो
विलूनपक्षस्तु यथा विहंगः स्थितं रसादिष्वथवा यथोक्तान् करोति धातुप्रभवान् विकारान्। कोपं च शीतानिलदुर्दिनेषु यात्याशु पू राम
र्वं शृणुत तत्ररूपं। निद्रागुरुत्वं च विजृंभणं च विश्लेषहर्षावथवांगमर्दः ततः करोत्यन्नमदाविपाकौ अरोचकं मंडलकोठमोहा

नेपालोदीर्घनीलपोरोषकोंतारसन्नता इत्येताजातयःस्थौल्यात्गुणान्वक्ष्याम्यतःपरंस्तुशीतोमधुरस्निग्धोबृंहणश्लेष्मसरः अविदाहीगुरु
र्वृष्यःपौंड्रकोभीरुकस्तथाआभ्यांतुल्यगुणःकिंचित्सक्षारोवंशकोमतः वंशवत्स्वतपेरस्तुकिंचिदुष्णःसवातहृत् । कोंतारतापसाविज्ञेयौवंश
कानुगुणौमतौएवंगुणस्तुकाष्ठेक्षुःसतुवातप्रकोपणः सूचीपत्त्रनीलपोरोनैपालोदीर्घपत्रकः वातलाकफपित्तघ्नासकषाविदाहिनः को
शकारोगुरुःस्निग्धोरक्तपित्तक्षयापहः अतीवमधुरोमूलेमध्येमधुरएवच अग्रेष्वक्षिषुविज्ञेयइक्षूणांलवणोरसः ॥ अविदाहीकफ
करोवातपित्तनिवारणःशर्करासमवीर्यःस्याद्यंत्रिकःपीडितोरसः गुरुर्विदाहीविष्टंभीयांत्रिकस्तुप्रकीर्तितः । पक्वोगुरुःसरःस्निग्धःस
तीक्ष्णःकफवातनुत्फाणितंगुर्वभिष्यंदिबृंहणंवत्रिदोषकृत गुडःसक्षारमधुरोनातिशीतःस्निग्धोमूत्ररक्तशोधनः नातिपित्तजिन्
वातघ्नोमेदःकफकरोबल्योवल्यःपथ्य । पित्तघ्नोमधुरःशुद्धोवातघ्नोसृक्प्रसादनः सपुराणोधिकगुणोगुडःपथ्यतमःस्मृतः मत्स्यंडिकाखं
डशर्करासिताजातानरोत्तरंशीताः स्निग्धागुरुतरामधुरतराश्चक्रमशःपारक्तपित्तप्रशामनाः यथायथैषांवैमल्यंमधुरत्वंतथातथास्नेह
गौरवशैत्यासिसरत्वंचततस्तथा । योयोमत्स्यंडिकाखंडशर्कराणांस्वकोगुणः तेनतेनैवनिर्दिष्टस्तेषांविभाव्यणोगुणः मधुशर्करापुनः
छर्द्यतीसारहरीरूक्षाछेदनी -- [illegible] कषायामधुरामधुरविपाकाच । यवासशर्करामधुरकषायातिक्तानुरसाश्लेष्महरीसराचेतिप
वृष्यःशर्कराःशोक्तासर्वाःदाहप्रणाशनाः रक्तपित्तप्रशमनाः छर्दिमूर्छाविषापहाः रूक्षंमरूकपुष्पोत्थंफाणितंवातपित्तलं कफघ्नम
धुरंपाकेकषायंवस्तिदूषणं ॥ इतीक्षुवर्गः ॥ मद्यंपित्तकरंमद्यंमस्रोरोचनंदीपनंभेदनंकफवातघ्नंहृद्यंबस्तिविशोधनंपाकेलघुविदाहुष्णं

23/8

पवरहा कुकृतः ६ कीदी६

नूरूस्नगोधमाडुतस्मासामसुजीप्प काभुमेधद्द १०

तीक्ष्णमिंद्रियबोधनं विकाशि सृष्टविण्मूत्रं भ्रमणुतस्य विशेषणं । मांधीकं मृद्विकाहिलावमधुराम्लं यततस्थापरक्तपित्ते पिसतं तुर्ष्णेप्रतिविष्य
तेमधुरं रूक्षं तु कषायानुरसं लघु । लघुपाकि सरं शोषविषमज्वरनाशनं । मार्द्वीकाल्यांतरं किंचिन्नवार्जूरं वातकोपनं तद्वद्विशदं लघु नची२
कफघ्नं कर्षणं लघु । कषायमधुरं हृद्यं सुगंधीन्द्रियबोधनं । काशाशेयिहरणी शोषमूत्राघातानिलापहा मस्तबस्तरक्तक्षयहिता सुरा दीपनद्वं
हरणी । काशाशेयिहरणी श्वासप्रतिश्यायविनाशनी श्लेष्मतोस्त्र कफस्तंभरक्तमांसकरी सुरा । सर्वा रोचकहृत्कुक्षितोदशूलप्रमर्दिनी । प्रसन्ना
कफवातार्शोविबंधानाहनाशनी पित्तलाल्पकफा रूक्षा यवैर्वातप्रकोपणी विष्टंभिनी सुरा गुर्वी श्लेष्मला तु मधूलिका । रूक्षानातिकफा वृष्या
नीष पाच्यावातकी स्मृता । त्रिदोषघ्नी मेघवच्चपश्चकोहल्लीवदनापिपः सुश्लोजगले: पक्वारुक्तस्तु कफशोफहासघ्न: प्रवाहिकाटोपदुर्नामाग्नि
॥८५॥ लशोफहृत् ॥ कफलोहतसारत्वाद्विश्रृष्टमीवातकोपनः । दीपनः सृष्टविण्मूत्रो विसदोल्पमदो गुरुः । कषायमधुरः सीधुः गौडः पाचन दीपनः ॥८५॥
काशाहयचा तद्वत्पक्वरसः सीधुः बलवर्णकरः सरः । शोफघ्नो दीपनो हृद्यो रुच्यः श्लेष्मार्शसां हितः । कर्षणः शीतरसिः स्वयथूदरनाशनः वर्णकृत् स्वरणः इक्षुरीरको
गः स्वर्यो विबंधघ्नो र्शसां मतः । आरिष्टिकः पांडुरोगघ्नो व्रणः संग्राहको लघु । कषायमधुरः शीतो पित्तघ्नो सृक्प्रसादनः । जांववौनिघ्नं स्तु मद्य४
वैरोवातकोपनः । सुतीक्ष्णस्तुरासवो हृद्यो मूत्रकृत् कफवातनुत् स्नुरवप्रियः स्थिरमदो विज्ञेयो रक्तनाशनः । लघुमध्वासव छेदी मेहकु
अरवायस ष्ठविषापहः । तिक्तः कषायश्चशोथघ्नस्तीक्ष्णस्वादुरवातकृत् । तीक्ष्णः कषायोमदकृत् दुर्नामकफगुल्मनुत् । कृमिमेदोनिलहरो मै राम
रेयोमधुरो गुरुः । बल्यः पित्तकरो वर्ण्यो हृद्यः वेक्षुरसासवः सीधुर्मधुकपुष्पोत्थो विदाह्यग्निबलप्रदः । रूक्षः कषायमधुरः कफहृद्वातपित्त

भुरासवयोर्कध्यानमै रैधी२ पदै५ ४ कोचीरस ५

प्रकोपणः। निर्दिष्टः शीतरसश्चात्याम्लः कंदमूलफलासवाः। नवं मद्यमभिष्यंदि गुरु वातादिकोपनं। अनिष्टगंधि विरसमहृद्यं च विदाहि
च। सुगंधि दीपनं हृद्यं रोचिष्णु कृमिनाशनं। स्फुटस्रोतस्करं जीर्णं लघु वातकफापहं। अरिष्टो द्रव्यसंयोगसंस्काराद्धिको गुणैः। बहुदोष
हरश्चैव दोषाणां शमनश्च सः। दीपनः कफवातघ्नः सरः पित्ताविरोधकृत्। शूलानाहोदरप्लीहज्वराजीर्णार्शसां हितः। पिप्पल्यादिकृतो गुल्मक
फरोगहरः स्मृतः। चिकित्सितेषु वक्ष्यंते ह्यरिष्टा रोगहराः। सदृप्य तु। अरिष्टासववसीधूनां गुणान् कर्माणि चादिशेत्। बुद्ध्वा यथास्वं संस्कारानवेक्ष्य कुशलो
भिषक्। सांद्रं विदाहि दुर्गंधि विरसं कृमिलं गुरु। अहृद्यं तरुणं तीक्ष्णमुष्णं दुर्भाजनस्थितं। अल्पौषधं पर्युषितमत्यच्छं पिच्छिलं च यत्। तद्वर्ज्यं सर्व
थामद्यं किंचिच्छेषं च यद्भवेत्। तद्वत्स्नेहेक संचारं तरुणं पिच्छिलं गुरु कफप्रकोपि तन्मद्यं दुर्जरं च विशेषतः। पित्तप्रकोपि बहलं तीक्ष्णमुष्णं विदाहि च।
अहृद्यं फेनिलं पूति कृमिलं विरसं गुरु तथा पर्युषितं वापि विद्याद्दनिलकोपनं। सर्वदोषैरुपेतं तु सर्वदोषप्रकोपणं। चिरस्थितं जातरसं दीपनं क
फवातजित्। रुच्यं प्रसन्नं सुरभि मद्यं सेव्यं मदावहं। ततः पाने कप्रकारस्य मद्यस्य रसवीर्यतः। सौक्ष्म्यादौष्ण्याच्च तैक्ष्ण्याच्च वि काशित्वा
च्च वह्निना समेत्य हृदयं प्राप्य धमनीरूर्ध्वमागतं। विक्षोभ्येंद्रियचेतांसि वीर्यं मदयतेऽचिरात्। चिरेण श्लेष्मिके पुंसि पानाज्जायते मदः। अ
चिराद्वातिके दृष्टः पैत्तिके शीघ्रमेव च। सात्त्विके शौचदाक्षिण्यहर्षमंडनलालसः। गीताध्ययनसौभाग्यसुरतोत्साहकृन्मदः। राजसे दुःखशी
लत्वमात्मत्यागं ससाहसं। कलहं सानुबंधं च करोति पुरुषे मदः। अशौचनिद्रामात्सर्यमगम्यागमलोलताः। असत्यभाषणं चापि कुर्या
द्धि तामसे मदः॥ रक्तपित्तकरं सूक्ष्मं दीपनं स्वापपाचनं। वैस्वर्यं जरणं श्लेष्मपांडुकृमिहरं लघु। तीक्ष्णोष्णं मूत्रलं हृद्यं कफघ्नं कटु पाकि

वातकृन्मदास्तुतंसर्वंरोचनंतुविशेषतः।गोजाविरसमुत्क्लानिमधुरस्तुक्लानियानिवा।यथापूर्वंगुरुतराण्येभिष्यंदकराणिवानुषांवुदी
पनंहृद्यंहृल्लांडुक्रमिरोगनुत्।मूत्रहृत्पर्शोविकारघ्नंभेदिसौवीरकंतथा।धान्याम्लंधान्ययोनित्वाज्जीवनंदाहनाशनंस्पर्शात्मनाद्तु
पवनकैत्त्यमाहरंलघुतैक्ष्ण्यास्त्वाहरेसात्मकरूपंगंहृष्यारणांतम्रुखवैरस्यदौर्गंध्यमलशोषक्लमापहं।दीपनंजरणंनेदिहितमास्थ्या
पनेषुवा।मरुधन्वपान्थितानांवजनानांसात्म्यमुच्यते॥इतिमद्यवर्गः॥गोमहिष्यजाविगजहयखरोष्ट्राणांतीक्ष्णानुष्णानिकटूनिति
२५ क्तानिलवणानुरसानिलघूनिशोधनानिवातकफकृमिमेदोविषगुल्मार्शउदरकुष्टशोफारोचकपांडुरोगहराणिहृद्यानिदीपना २९॥
निवसामान्यतःसर्वनिवाच॥तत्सर्वंकटुतीक्ष्णोष्णंलवणानुरसंलघुशोधनंकफवातघ्नंहृद्यंदीपनपावनं।गोमूत्रंकटुतीक्ष्णोष्णं
सक्षारंवाल्पवातलंलघ्वग्निदीपनंमेध्यंपित्तलंकफवातनुत्।गुल्मशूलोदरानाहविरेकास्थापनादिषुमूत्रप्रयोगसाध्येषुगव्यं
मूत्रंप्रयोजयेत्।दुर्नामोदरशूलेषुकुष्टमेहविशुद्धिषुआनाहशोफगुल्मेषुमहिष्याःपांडुरोगनुत्।कटुतिक्तान्वितंछागमीषन्मा
रुतकोपनं।काषश्वासशोषवर्चोग्रहेहितं।सक्षारंतिक्तकटुकमुष्णंवातघ्नमाविकं।दीपनंकटुतीक्ष्णोष्णंवातचेतोविकारनु
त्आश्वंकफहरंमूत्रंकृमिदद्रुषुशस्यते।सतिक्तंलवणंभेदिवातघ्नंपित्तकोपनं।तीक्ष्णंक्षारेकिलासेचनागंमूत्रंप्रयोजयेत्।गरचेतो
विकारघ्नंतीक्ष्णंजठररोगजित्।दीपनंगार्दभंमूत्रंकृमिवातकफापहं।शोफकुष्टोदरोन्मादमारुतकृमिनाशनंचार्शोघ्नंकारभंमूत्रं

मात्रपंतुविषापहं॥ इति मूत्रवर्गः॥ द्रवद्रव्याणि सर्वाणि समासात्कीर्त्तितानि तु देशकालविभागज्ञोनृपतेर्दातुमर्हति॥ ॥ इति सुश्रुतस्या
नेपंचचत्वारिंशोध्यायः॥ ॥ अथातोन्नपानविधिमध्यायंव्याख्यास्यामः॥ ॥ धन्वंतरिमभिवाद्यसुश्रुतउवाचप्रागभिहितंप्राणिनांपुन
र्मूलमाहारोबलवर्णौजसांचसषट्सुरसेष्वायत्तः रसाः पुनर्द्रव्याश्रयिणः द्रव्यरसगुणवीर्यविपाकनिमित्तेचक्षयवृद्धीदोषाणांसाम्यं
चब्रह्मादेरपिचलोकस्याहारः स्थित्युत्पत्तिविनाशहेतुः आहारादेवाभिवृद्धिर्बलमारोग्यंवर्णेंद्रियप्रसादश्चतथाह्याहारवैषम्यादस्वा
स्थ्यंतस्याशितपीतलीढखादितस्यनानाद्रव्यात्मकस्यानेकविकल्पस्यानेकविधप्रभावस्यपृथक्पृथग्द्रव्यरसगुणवीर्यविपाकप्रभावक
र्माण्यभिज्ञातुंनह्यनवबुद्धस्वभावाभिषजोरोगनिग्रहंकर्तुंस्वस्थस्यवृत्तिंचकर्तुंसमर्थाः आहारायत्ताश्चसर्वप्राणिनोयस्मात्तस्मादन्नपानवि
धिमुपदिशतुमेभगवानितिउक्तः प्रोवाचभगवान्धन्वंतरिः अथखलुवत्ससुश्रुतयथाप्रश्नमुच्यमानमुपधारयस्वतत्रलोहितकशालि
कलमकर्दमकपांडुकसुगंधकशकुनाहृतपुष्पांडकपुंडरीकमहाशालिशीतभीरुकरोध्रपुष्पकदीर्घशूककांचनकमहिषमस्तकहाय
नकदूषकप्रभृतयः शालयः मधुरावीर्यशीतालघुपाकाबलावहाः पित्तघ्नाअल्पानिलकफाः स्निग्धाबद्धाल्पवर्चसः तेषांलोहित
कः श्रेष्ठोदोषघ्नः शुक्रमूत्रलः चक्षुष्योवर्ण्यबलकृत्स्वर्योहृद्यः श्रमापहः व्रणोज्वरहरश्चैवसर्वदोषविषापहः तस्मादल्पांतरगुणाः क्र
मशः शालयोवराः षष्टिककांगुकमुकुंदकपीतकप्रमोदककालकाशनपुष्पकमहाषष्टिकचूर्णककुरववकेदारकप्रभृतयः षाष्टिकाः

रसेपाकेचमधुराःशमनावातपित्तयोः॥शालीनांचगुणैस्तुल्याबृंहणाःकफशुक्रलाः॥कृष्णव्रीहिस्तारामुखंजन्तुमुखंनंदीमुखश्चाटीमुखकल

वास्त्वरितककुक्कुटांडकपारावतपाटलप्रभृतयः॥कषायमधुरारसेमधुरापाकेवीर्यतोहिमास्वल्पाभिष्यंदिनःतुल्याषष्टिकैश्चबद्धवर्च

सः॥कृष्णव्रीहिर्वरस्तेषांकषायानुरसोलघुः॥तस्मादल्पांतरगुणाःक्रमशोव्रीहयःपरे॥दग्धायामवनौजाताशालयोलघुपाकिनः॥कषायाबद्ध

दोजा २ विण्मूत्रारूक्षाश्लेष्मापकर्षणाः॥स्थलजाःकफपित्तघ्नाःकषायाःकटुकान्वयाः॥किंचित्सतिक्तमधुराःपवनानलवर्द्धनाः॥कैदारामधुरावृष्या

बल्याःपित्तनिबर्हणाः॥ईषत्कषायाल्पमलागुरवःकफशुक्रलाः॥रोप्यातिरोप्यालघवःशीघ्रपाकागुणोत्तराः॥अदाहिनोदोषहराबल्यामूत्रवि

वर्द्धनाः॥शालयश्छिन्नरूढायेरूक्षास्तेबद्धवर्चसः॥तिक्ताःकषायाःपित्तघ्नालघुपाकाःकफापहाः॥विस्तरेणसमुद्दिष्टाशालितव्रीहिताहितः

॥८७॥ ग्राम्येषुमांसेषुफलेषुचैवशाकेषुधान्येष्वपिहाप्रमेयात्॥इतिशालिवर्गः॥लघुक्षुद्रधान्यमुद्गादिमाषादीनांचकैवस्यते।कोरदूषकश्यामा ॥८७॥

अन्नं वैतर कश्यामाकनीवारशांतनुवरकोद्दालकप्रियंगुमधुलिकानंदीमुखीकुरुविंदकगवेधुकसरवरकतोदपर्णीमुकुंदवेणुयवप्रभृतयःक्षुधा

न्यविशेषाः॥उष्णाःकषायमधुरारूक्षाःकटुविपाकिनः॥श्लेष्मघ्नाबद्धनिष्यंदावातपित्तप्रकोपणाः॥कषायमधुरास्तेषांशीताःपित्तापहास्मृ

ताः॥कुस्मारकाश्चपीताश्चश्वेताश्चैवप्रियंगवः॥पथ्योन्नेरक्षवानास्तुरूक्षाःकफहरास्मृताः॥मधुलीमधुराशीतास्निग्धानंदीमुखीतथा

विशोषीतत्रभूयिष्ठंवरुकःसमुकुंदकः॥रूक्षावेणुयवाज्ञेयावीर्योष्णाकटुपाकिनः॥बद्धमूत्राःकफहराःकषायावातकोपनाः॥इति राम

क्षुद्रधान्यवर्गः॥मुद्गवनमुद्गकलायमकुष्टमसूरमंगल्यचणककसतीनत्रिपुटकहरेण्वाढकीप्रभृतयोवैदलाः॥कषायामधुराशीताः

क्षद्र १ धीताधा धौजरी वैलारी २ स्वल्पचक्रेला १
मकुष्ठ ५ वाजु वार्गिमकुश २

चौला ८

रुपाका मरुत्कराः। बद्धमूत्रपुरीषाश्च पित्तश्लेष्महरास्तथा॥ नात्यर्थं वातलास्तेषां मुद्गा दृष्टिप्रसादनाः। प्रधाना हरितास्तत्र वन्या
मुद्गसमास्स्मृताः। विपाके मधुरा प्रोक्ता मसूरा बद्धवर्चसः। मकुष्टकास्तु कृमिहराः कलापा प्रचुरानिलाः। आढकी कफवातघ्नी नातिवात
प्रकोपणी। ता एव घृतसंयुक्तास्त्रिदोषशमनास्स्मृताः। वातलाः शीतमधुराः कषाया विरूक्षणाः कफशोणितपित्तघ्ना वर्णकाः पुंस्त्वना
शनाः। हरेणवसतीनाश्च विज्ञेया बद्धवर्चसः। अतो मुकमसूराभ्यां मन्येत्वा आनाहकारकाः। माषो गुरुर्भिन्नपुरीषमूत्रः स्निग्धोष्णवृष्यो
मधुरोऽनिलघ्नः। संतर्पणः स्तन्यकरो विशेषाद् बलप्रदः शुक्रकफापहश्च। वृषाप्रभावान्न पुरीषभेदी न मूत्रलो नैव कफस्य कर्ता॥
स्वादुर्विपाके मधुरोऽलसाग्रो संतर्पणः स्तन्यरुचिप्रदश्च। माषैः समानं फलमात्मगुप्तं सैव काकांडफलं तथैव। आरण्यमाषा गुणतः
प्रदिष्टा रूक्षाः कषायाः अविदाहिनश्च। संग्राहकः पीनसकासहारी उष्णो हि वीर्येण कफमारुतघ्नः। आनाहमेदोगुदकीलहिक्काश्वा
सापहः शोणितपित्तदश्च। कफस्य हन्ता नयनामयघ्नो विशेषतो वन्यकुलत्थ उक्तः। कुलत्थ उक्तो मधुरो विदाही विष्टम्भकृन्मारुतपित्त
कोपी स्तन्ये हितः शोफविषापहन्ता स एव नेत्रामयिनां प्रशस्तः॥ इषत्कषायो मधुरसस्तु तिक्तः संग्राहकः पित्तकरस्तु रक्तः। तिलो विपा
के मधुरो बलिष्ठः स्निग्धो व्रणे लेपन एव पथ्यः। दन्त्योऽग्निमेधाजननोऽल्पमूत्रस्त्वच्योऽथ केश्यो ऽनिलहा गुरुश्च। तिलेषु सर्वेष्वसितः प्रधा
नो मध्यः सितो हीनतरास्तथान्ये। यवः कषायो मधुरो हिमश्च कटुर्विपाके कफपित्तहारी व्रणेषु पथ्यश्च तिलवच्च नित्यं प्रबद्धमूत्रो बहु
वातवर्चाः स्थैर्याग्निमेधास्वरवर्णकृच्च सपिच्छिलः स्थूलविलेखनश्च मेदोमरुत्तृड्हरणोऽतिरूक्षः प्रसादनः शोणितपित्तयोश्च। एभिर्गु

मकुष्ठ ६
धर्नकुलत्थ ६
कुलत्थ ८

क्ष १ कै ५

नाकुलजव

नमचीयका

ते हीनगुणास्तु किंचिद्धि धाधवेभ्यो तितथा वातरोषैः। गोधूमस्तु को मधुरो गुरुश्च बल्यः स्थिरः शुक्ररुचिप्रदश्च। स्निग्धोतिशीतोनिलपि
त्तहारी संधानकृत् श्लेष्मकरः सरश्च। रूक्षः कषायो विषदोपि लघुः कफवलासहृष्टि न्नयकृद्दाह। कटुर्विपाके मधुरश्च निर्दिः प्रभि
न्नविड् मारुतपित्तलश्च। सिता सिता पीतकरकवर्णभवेति येनैकविधास्तु शिंबाः। यथोदितास्ते गुणतः प्रधाना ज्ञेयाः कटूष्मार
सपाकयोश्च। महाद्वयं मूलकजाश्च शिंबाः कुशिंबिवल्लीफलवाश्च शिंबाः। ज्ञेया विपाके मधुरा रसे वा बलप्रदाः पित्तनिवर्हणाश्च।
विदाहवंतश्च भवंति रोचरुक्ता विष्टंभजीर्पंत्यनिलप्रदाश्च। रुचिप्रदाश्चैव तु दुर्जराश्च सर्वे स्मृता वै दलिकाश्च शिंबाः। कटुर्विपाके क
टुकः कफघ्नो विदाहमावाहिता कुसुंभः। उष्णास्तसीस्वादुरसानिलघ्नी पित्तोल्वणा स्यात्कटुका विपाके रसे वापि कटुः प्रदिष्टः। सिद्धार्थ
कः शोणितपित्तहेतुः स्निग्धोष्णतीक्ष्णः कफमारुतघ्नः। तथागुणश्चासितसर्षपोपि। अनार्तवं व्याधिहतं मपर्यागतमेव वाप्यभूमिजं न
वं वपि न धान्यं गुणवत्तत्। नवं धान्यमभिष्यंदि लघु संवत्सरोषितं। विदाहि गुरु विष्टंभि विरूढं दोल्यादुः। सर्षपांनस्य विविधस्यास्य
भागशः। कालप्रवर्धितं सर्वधान्यं परिसन्नति गौरवं। न तु संजनितदीर्यं क्रमशो विजहाति तत्। धान्यानां संस्कारमात्राः संपरि
कीर्तिताः। इति शिंबीधान्यवर्गः। लघु पथ्यतमं प्रोक्तं यवपथ्यतमं मंसं नं यद्घदाग यतिहितं तत्र लघुतरं स्मृतं। अथ मांसवर्गस्तु
परेस्याम। तद्यथा जलेशया पाश्च शुपायाम्या... व्यंतनएकशफा जांगलाश्चेति षण्मांसवर्गाः तेषां तु नेरो नराः प्रधानतमाः तेषु न
ष्टविधा जांगलाश्चानुपाश्च तत्र जांगलवर्गोष्टविधः तद्यथा जंघाला विष्किराः प्रतुदा गुहाशयाः प्रसहाः पर्णमृगा विलेशया ग्राम्याः।

मुद्गवनी ६
त्तरनिवनी ६
॥८८॥

सर्वीर
॥८८॥
पाके ६
तत्त्व ७
राम

जप्र ४

ष्वेति तेषां मध्ये जंघालविष्किरौ प्रधानतमौ। तावेणहरिणर्क्ष्यकुरंगकरालकृतमालशरभश्वदंष्ट्रापृषतचारुष्कमृगमातृकाः प्र
सृतपो जंघालाः मृगाः: कषायामधुरा लघवो वातपित्तहरास्तीक्ष्णा हृद्या वस्तिविशोधनाश्च कषायमधुरो हृद्यः पित्तासृक्कफरोगहा
संग्राही रोचनो बल्यस्तेषां मेणो ज्वरापहः मधुरो मधुरः पाके दोषघ्नो बलदीपनः शीतलो बद्धविण्मूत्रः सुगंधिर्हरिणो लघुः एणः कृष्ण
स्तयोर्ज्ञेयो हरिणस्ताम्र उच्यते नातिकृष्णो न वा रक्तः कुरंगः परिकीर्तितः शीतासृक्पित्तशमनी विज्ञेया मृगमातृका सन्निपातक्षय
श्वासकासहिक्काऽरुचिप्रणुत् लावतित्तिरिकपिंजलवर्तिकावर्तिकचटकवार्तिकचकोरकलविंकमयूरक्रकरोपचक्रकुक्कुट
शारंगशतपत्रककुतित्तिरिकुरुवाहकयवालकप्रभृतयस्त्वाहलाविष्किराः लघवः शीता मधुराः कषाया दोषनाशनाः वर्गो त्वादुरसा
वर्णो कषायानुरसो लघुर्वातपित्तज्वरव्रणवंधुभिः सहरो नातिशीतो लावो वस्तिशोधनः। ईषद्गुरूष्ण मधुरो वृष्यो मेधाग्निवर्द्धनः तित्ति
रिः सर्वदोषघ्नो ग्राही वर्णप्रसादनः रक्तपित्तहरो शीतो लघुश्चापि कपिंजलः। कफोत्थेषु च रोगेषु मंदवाते च शस्यते। वातपित्तह
रा वृष्या मेधाग्निबलवर्द्धनाः लघवः क्रकरा हृद्यास्तथा चैवोपचक्रकाः कषायस्वादुलवणस्त्वच्यः केश्यो रुचौ हितः मयूरः स्वरमेधाग्निदृ
क्श्रोत्रेन्द्रियदार्ढ्यकृत् स्निग्धोष्णोऽनिलहा वृष्यः स्वेदस्वरबलावहः। कुक्कुटो बल्यः तद्वद्ग्राम्यो गुरुस्तु सः वातरोगक्षयवमि
विषमज्वरनाशनः कपोतपारावतभृंगराजपरभृतकोयष्टिकुलिंगगृहकोकिलडिंडिमाणवकशतपत्रकमातृनिंदकमेदाशीशुकसा
रिकावल्गुलीगिरिशांगुलीलट्टषक्सुगृहाखंजरीटकहारीतदात्यूहकप्रभृतयः प्रतुदाः कषायमधुरा रूक्षाः फलाहारा मरुत्कराः

पित्तश्लेष्महराः शीतावद्धमूत्राल्पवर्चसः सर्वदोषकरस्तेषां भेदश्चाक्षिमलदूषकः कषायस्वादुलवणो गुरुः काणकपोतकः रक्तपित्तप्रश-
मनः कषायो विशदोऽपि च विपाके मधुरश्चापि गुरुः पारावतस्मृतः कुलिंगो मधुरः स्निग्धो कफशुक्रविवर्द्धनः रक्तपित्तहरो वेश्मकुलि-
गस्त्वतिशुक्रलः ॥ सिंहव्याघ्रतरक्ष्वृक्षद्वीपिमार्जारशृगालमृगैर्वारुकप्रभृतयो गुहाशयाः ॥ मधुरा गुरवः स्निग्धा बल्या मारुतनाशनाः
उष्णवीर्या हिता नित्यं नेत्रगुह्यविकारिणां ॥ काककंककुररचाषभासशशघ्नोलूकचिल्लश्येनगृध्रप्रभृतयः प्रसहा एते सिंहादिभिः सर्वे स-
माना वायसादयः रसवीर्यविपाकेषु विशेषाच्छोषिणे हिताः ॥ मत्स्यमूषिकदर्दुरशाविकाररवकाशाशतिघसखजिरप्रभृतयः पर्ण-
मृगाः मधुरा गुरवो वृष्याश्चक्षुष्याः शोषिणे हिताः ॥ सृष्टमूत्रपुरीषाश्च कासार्शःश्वासनाशनाः ॥ श्वाविच्छल्यकगोधाशशवृषदंशलो-
॥२८॥ पाकलोमशकर्णकदलीमृगविप्रियकाजगरसर्पमूषिकनकुलमहाबभ्रुप्रभृतयो बिलेशयाः ॥ बद्धमूत्राः संहननतकुपुरितोवीर्ये
बोष्णाश्च वत्स्वादुपाकाः वातहराः श्लेष्मपित्तेव कुर्युः स्निग्धाः श्वासकासकारपि महाश्च कषायमधुरस्तेषां शशः पित्तकफापहः ॥ ना-
तिशीतोष्णवीर्यत्वाद्वातसाधारणो मतः गोधा विपाके मधुरा कषायकटुका रसे वातपित्तप्रशमनी बृंहणी बलवर्द्धनी शल्यकः स्वा-
दुपित्तघ्नो लघुशीतो विषापहः प्रियको मारुते पथ्योऽजगरः स्यादर्शसे हितः दुर्नामानिलदोषघ्नाः कृमिदूषीविषापहाः वक्ष्युष्णा मधुराः
पाके सर्पा मेधाग्निवर्द्धनाः ॥ अश्वाश्वतरगोखरोष्ट्रबस्तोरभ्रमेदःपुच्छकप्रभृतयो ग्राम्याः ग्राम्या वातहराः सर्वे बृंहणाः कफपित्तलाः राम
मधुरा रसपाकाभ्यां दीपना बलवर्द्धनाः नातिशीतगुरुः स्निग्धो मंदपित्तकफः स्मृतः छागलस्त्वनभिष्यंदी तेषां पीनसनाशनः ॥ बृंहणं मास

मैषंत्रंपित्तश्लेष्मावहं गुरु मेदः पुष्टो जवं तद्रूपमौरभ्रसहद्रोगुणैः श्वासकासप्रतिश्यायविषमज्वरनाशनं श्रमात्यग्निहितं गव्यं प
वित्रमनिलापहं चौरभ्रवत्सलवणं मांसमेकशफोद्भवं। अल्पाभिष्यंघयंवर्गे जांगलाः मधुराहताः। दूरेजनान्तनिलयाः दूरेपाती
यगोचराः येमृगाश्च विहगाश्च ते ल्पाभिष्यंदिनो मताः। अतीवासन्ननीलयासमीपोदकगोचराः। येमृगाश्च विहंगाश्च महाभिष्यं
दिनस्तु ते। आनूपवर्गस्तु पंचविधः तद्यथा कूलचराप्लवाः कोशस्थाः पादिनमत्स्याश्च। तत्र गजगवयमहिषरुरुचमरसृमररोहित
वराहखड्गगोकर्णकालपुच्छकोंद्रन्यंकुनयः कूलचराः पशवः वातपित्तहरा वृष्या मधुरारसपाकयोः शीतला बलिनः स्निग्धा मूत्रलाः कल
वर्द्धनाः विरूक्षणो लेखनश्च वीर्योष्णः पित्तदूषणः स्वाद्वम्ललवणस्तेषां गजश्लेष्मानिलापहः गवयस्य तु मांसं तु स्निग्धं मधुरकास
जित् विपाके मधुरं वापि व्यवायस्य तु वर्द्धनं। स्निग्धोष्णो मधुरो वृष्यो माहिषस्तर्पणो गुरुः निद्रापुंस्त्वबलस्तन्यवर्द्धनो मांसदार्ढ्यकृत्।
रुरोर्मांसं समधुरं कषायानुरसं स्मृतं वातपित्तोपशमनं गुरु शुक्रविवर्द्धनं। तथा चमरमांसं तु कषायानुरसं स्मृतं वातपित्तोपश
मनो रोहितो गुरुः शुक्रलः स्वेदनं बृंहणं वृष्यं शीतलं तर्पणं गुरुः श्रमानिलहरं स्निग्धं वाराहं बलवर्द्धनं कफघ्नं खड्गपिशितं कषाय
मनिलापहं। पित्र्यं पवित्रमायुष्यं बद्धमूत्रं विरूक्षणं हंससारसक्रौंचचक्रवाककुररकादंबकारंडवजीवंजीवकबकबलाकापुंडरी
कप्लवशरारीमुखनंदीमुखमद्गुटिट्टिभशुक्लादमालिकाशपुष्करशायिकाकोनालिकांबुकुक्कुटिकामेघरावक्रौंचवारलप्रभृतयः प
वाः संघातचारिणः प्लवाः पित्तहराः शीताः स्निग्धा वृष्या मरुज्जिताः सृष्टमूत्रपुरीषाश्च मधुरा रसपाकयोः [illegible]

[illegible]नांखशाखन कम्बुक्तिशंबूकमल्लूकप्रभृतयः कोशस्थाः कुर्मकुंभीरकर्कटशिशुमारप्रभृतयः पादिनः शंखकुर्मादयः स्वादुर
सपाका मरुन्नुदः शीताः स्निग्धा हिताः पित्ते वर्चस्याः श्लेष्मवर्द्धनाः कर्कटस्तेषां बल्यः कोष्णोनिलापहः शुक्रः संधानकृत् [illegible] सृष्ट
विण्मूत्रोनिलपित्तहा ॥ मत्स्यास्तु विविधा नानाः [illegible] रोहितपाठीनपाटलाराजीववर्मिगोमत्स्यकृष्णमत्स्यवागुजारमुरल
सहस्रदंष्ट्रप्रभृतयो नादेयाः। नादेया मधुरा मत्स्या गुरवो मारुतापहाः रक्तपित्तकराश्चोष्णा वृष्याः स्निग्धाल्पवर्चसः कषायानुरसास्तेषां शष्प
शैवलभोजनाः रोहितो मारुतहरो नात्यर्थं पित्तकोपनः पाठीनश्लेष्मलो वृष्यो निद्रालुः पिशिताशनः दूषयेद्रक्तपित्तं तु कुष्ठरोगं
करोत्यसौ। मुरलो बृंहणो वृष्यो स्तन्यश्लेष्मकरस्तथा सरस्तडागसंभूताः स्निग्धाः स्वादुरसाः स्मृताः ॥ महाह्रदेषु बलिनः स्वल्पमेदा मताः ॥
तिमितिमिंगिलकुलिशपाक[illegible] नक्रगर्गरकचंद्रकमहामीनराजीवप्रभृतयः सामुद्राः सामुद्रा गुरवः स्निग्धा म
धुरा नातिपित्तलाः उष्णा वातहरा वृष्या वर्चस्याः श्लेष्मवर्द्धनाः बलावहा विशेषेण मांसाशित्वाच्च भूदजाः समुद्रजेभ्यो नादेया
बृंहणत्वाद्गुणोत्तराः। तेषामप्यनिलघ्नत्वाच्चौंड्यकौपौ गुणोत्तरौ ॥ स्निग्धत्वात्स्वादुपाकत्वात्तयोर्वाप्या गुणाधिकाः नादेया गुरवो म
ध्ये यस्मात्पुच्छास्यचारिणः। सरस्तडागजानां तु विशेषेण शिरो गुरु [illegible] दुरगोचरा यस्मात्तस्मादुत्सोदपानजे [illegible] महाशिखपुंदीम
सवर्णाख्या [illegible] व्याधिविषमर्पहं [illegible] जीर्णज्वरा बालानां [illegible] वारिणश्च मांसान्यम [illegible] यस्माद्विगतया
पन्ना बहत परिणतान्यः [illegible] वीर्यवत्त्वा [illegible] मांसं। [illegible] विषव्याधि

हृतंमृत्सुंबाल्यंछर्दिंश्लेष्मकोपयेत्।कासश्वासकरंवृद्धंत्रिदोषंव्याधिदूषितां।क्लिन्नमुत्क्लेशजननंकृ
शंवातप्रकोपनं।स्त्रियश्चतुःपादेषुपुमांसोविहगेषुमहाशरीरेष्वल्पशरीराःअल्पशरीरेषुमहाशरी
राः।प्रधानतमाः।एवमेवैकजातीयानांमहाशरीरेभ्यः।कृशशरीराःप्रधानतमाः।स्थानादिहितंतुमां
संस्याद्गुरुलाघवमुपदेक्ष्यामः।तद्यथा।।रक्तादिषुशुक्रांतेषुधातुषूत्तरोत्तरागुरुतराः।तथाशक्थि
स्कंधक्रोडशिरःपादकरकटीपृष्ठचर्मकालेयकंपक्वदंत्राणि।शिरस्कंधकटीपृष्ठशक्थिनीचात्मप
क्षयोः।।गुरुपूर्वंविजानीयात्धातवस्तुयथोत्तरं।सर्वस्यप्राणिनोदेहेमध्योगुरुरुदाहृतः।पूर्वभागो
गुरुःपुंसामधोभागःस्त्रियोषितां।उरोग्रीवंविहगानांविशेषेणगुरुःस्मृतं।पक्षोत्क्षेपात्समोदृष्टोम
ध्यभागस्तुपक्षिणां।अतीवरूक्षंमांसंतुविहंगानांफलाशिनां।बृंहणंमांसमत्यर्थंखगानांपिशि
ताशिनां।मत्स्याशिनांपित्तकरंवातघ्नंधान्यचारिणां।जलजानूपजाग्राम्याःक्रव्यादेकशफास्तथा।

४० प्रमहाबिलवासा श्वयेवजं धान्वसंज्ञिताः प्रतुदा विष्किरास्चैव जलधवस्क्षयथोत्तरं अल्पाभिष्यंदि
नश्चैव यथापूर्वमतोन्यथा । सर्वप्राणिनां सर्वशरीरेभ्यो ये प्रधानतमा भवंति । पक्षि त्वक्षोश्च वर्त्तिनं स्थाना
द्दारीतप्रधानात्ताभेमध्या वयस्त्वक्सधर्मेक्षि शुद्धमुपादेयं मांसमिति ॥ भवति चात्र ॥ वक्षःशरीरावयवा २३
:स्वभावोधातवः क्रियाः । लिंगं प्रमाणं संस्कारो मात्रा चास्मिन्परीक्षिता इति ॥ ॥ इति मांसवर्गः ॥ ॥
वृषपुत्र्यं शरीरावयवाः स्वभावो धातवः क्रिया अर्द्धं फलवर्गानुपदेक्ष्यामः ॥ तद्यथा । दाडिमामलकव
दरकोलुकर्कंधु सौवीरसिंचितिकफलकपित्थमातुलुंगाम्रातककरमर्द्दकपियालनारंगजंबीरल
कुचभव्यपारावतवेत्रफलप्राचीनामलकतिंतिडीकनीपकोशाम्रामलीकाप्रभृतीनि अम्लानि ।
रसतः पाकेच्युरूक्षाणि वीर्यतः । पित्तलान्यनिलघ्नानि प्रायः श्लेष्मकराणि वा । कषायानुरसं तेषां
दाडिमं नातिपित्तलं । दीपनीयं रुचिकरं हृद्यं वर्चोविबंधनं । द्विविधं तत्तु विज्ञेयं मधुरं चाम्लमेव च

(left margin notes:) ११८ १ ॥ सैंधकुतिवदर नाति:३ ता जफला दर्शनं ३ फल मरूपफ ३
(right margin note:) राम ११८ १ ॥

ननीयामलक ३ दस्ता नूकेना ४ नीबोराजेकदेव:३ फफर मसावा ३

दोषघ्नंतुमधुरंअम्लंवातकफापहं।अम्लंसमधुरंतिक्तंकषायंकटुकंरसे।चलघुपथ्यंसर्वदोषघ्नंवृष्यमामल
काधु३ कीफलं।हन्तिवातंतदम्लत्वात्पित्तंमाधुर्यशैत्यतः।कफंरूक्षकषायत्वात्फलेभ्योऽस्याधिकंतुतत्।कर्क
धुकोलंवदरंमांसमपित्तकफावहं।पक्वंपित्तानिलहरंस्निग्धंसमधुरंसरं।पुरातनंतृट्शमनंश्रमघ्नंदीप
नंलघु।सौवीरंवदरंस्निग्धंमधुरंवातपित्तजित्।कषायंस्वादुसंग्राहिशीतंसिंचितिकाफलं।आम्रंकपीत्य
मस्वर्यंकफघ्नंग्राहिवातलं।कफानिलहरंपक्वंमधुराम्लरसंगुरु।कासश्वासारुचिहरंतृष्णाघ्नंकंठशो
धनं।लघ्वग्निदीपनंहृद्यंमातुलुंगमुदाहृतं।त्वक्तिक्तादुर्जरातस्यवातक्रिमिकफापहा।स्वादुशीतंगु
रुस्निग्धंमांसंमारुतपित्तजित्।मेध्यंशूलानिलच्छर्दिकफारोचकनाशनं।दीपनंलघुसंग्राहिगुल्मा
र्शोघ्नंतुकेसरं।शूलाजीर्णविबंधेषुमंदेऽग्नौकफमारुते।अरुचौचविशेषेणरसस्तस्योपदिश्य
ते।पित्तमारुतकृद्बालंपित्तलंवद्धकेसरं।हृद्यंवर्णकरंरुच्यंरक्तमांसबलप्रदं।कषायाम्लरसंस्वा

पात्ति ८

४॰ उवातघ्नं बृंहणं गुरु । पित्ताविरोधि संपक्वमाम्रं शुक्रविवर्धनं । बृंहणं मधुरं बल्यं गुरु विष्टंभ्यं जीर्य
ति । आम्रातकफलं वृष्यं सस्नेहं श्लेष्मवर्धनं । त्रिदोषविष्टंभकरं लकुचं शुक्रनाशनं । अम्लं तृष्णा
पहं रुच्यं पित्तकृत्करमर्दकं । वातपित्तहरं वृष्यं प्रियालं गुरु शीतलं । हृद्यं स्वादु कषायाम्लं भव्य
मास्यविशोधनं । पित्तश्लेष्महरं ग्राहि गुरु विष्टंभि शीतलं । पारावतं सुमधुरं रुच्यमत्यग्निवातजि
त् । गरदोषहरं नीपं प्राचीनामलकं तथा । वातापहं तिंतिडिकमामं पित्तबलासकृत् । ग्राहि दी
पनं रूक्षं संपक्वं कफवातजित् । तस्मात्स्वल्पांतरगुणं कोशाम्रफलमुच्यते । अम्लीकायाः फ
लं पक्वं तद्वदेव हि केवलं । अम्लं समधुरं हृद्यं विशदं भक्तरोचनं । वातघ्नं दुर्जरं प्रोक्तं नागरंगफ
लं गुरु । तृष्णाशूलकफोत्क्लेशछर्दिश्वासनिवारणं । वातश्लेष्मविबंधघ्नं जंबीरं गुरु पित्तजित्
। ऐरावतं हंत शठमम्लं शोणितपित्तकृत् । क्षीरवृक्षफलं तावद्राजादनं तिंडकं वकुलं धन्वनं

॥८२॥ अम्ल फलवी ...षि ५

राम ...२ ॥८२॥

नीबु १ जीरी १ ...फल २

न्मंतकाः न्यक्रोधफल्गुमारूषकंगांगेरुकी पुष्करवर्त्तिविं ःचवीवी प्रभृतीनि फलान्येतानि
शीतानि कफपित्तहराणि वा संग्राहकानि रूक्षाणि कषायमधुराणि च [illegible]
। क्षीरवृक्षफलं तेषां गुरु विष्टंभि शीतलं। कषायमधुरं साम्लं नातिमारुतकोपनं। अत्यर्थं वा
तलं ग्राहि हृद्यं च वं कफवातजित [illegible] स्निग्धं स्वादु कषायं च राजादनफलं गुरु। कषायं मधु
रं हृद्यं तो हन्त कफवातजित। अश्मो[illegible] लघु संग्राहि स्निग्धं पित्ताग्निवर्द्धनं। आम्रं कषायं स
ग्राहि तिंदुकं वातकोपनं।। विपाके गुरु संपक्वं मधुरं कफपित्तजित। मधुरं च कषायं च स्निग्धं
संग्राहि बाकुलं।। छिरीकरं च दन्तानां विथारं फलमुच्यते। सकषायं हिमं स्वादु धान्वनं कफ
वातजित। तद्वद्गांगेरुकं विद्यादश्मंतकफलानि च। विष्टंभि मधुरं स्निग्धं फल्गु तंतर्पणं गुरु
ः अत्यल्पमीषन्मधुरं कषायानुरसं लघु। वातघ्नं पित्तजननं आमं विद्यात्परूषकं। तदेव पक्वं

नार१ फल्गुफरी१ फरूस्ना१ गांगेरुकी१ धमोह८ कुं२१

रुतुद

धामीनाउ

४० मधुरंवातपित्तनिर्वहणं।विपाकेमधुरंशीतंरक्तपित्तप्रसादनं।पौष्करंस्वादुविष्टंभिवल्यंक
फकरंगुरु।कफानिलहरंतीक्ष्णंस्निग्धंसंग्राहिदीपनं।कटुतिक्तकषायोष्णंवातंविल्वमुद्दृ
हृतं।विघ्नाद्रेवसंपक्वंमधुरानुरसंगुरु [illegible] विदाहविष्टंभकरंदोषकृत्स्नू
तिमारुतं।निवीफलंसाम्लकांतंतुल्यहृत्पित्तजीतं।तृड्दाहज्वरपित्तास्रक्कासश्वासविषा
पहं।तालनतालिनालिकेरपनसमोचप्रभृतीनीवास्वादुपाकरसान्याहुर्वातपित्तहराणिवा
वलप्रदानिस्निग्धानिवृंहणानिहिमानिच।फलंस्वादुरसंतेषांतालजंगुरुपित्तजित।तद्वी
जंस्वादुपाकंतुमूत्रलंवातपित्तजित।नालिकेरंगुरुस्निग्धंपित्तघ्नस्वादुशीतलं।वलमां
सप्रदंहृद्यंवृंहणंवस्तिशोधनं।पनसंसकषायंतुस्निग्धंस्वादुरसंगुरु।मोचंस्वादुरसंप्रोक्तं
कषायंनातिशीतलं।रक्तपित्तहरंरुच्यंवृष्यंश्लेष्मकरंगुरु।द्राक्षा[illegible]मर्यमधुकपुष्पंप्रभृ

बदाम ५

...री ५

तीनि रक्तपित्तहराणि च। गुरूणि मधुराणि च। श्लेष्मलानि च बृंह्याणि संग्राहीणि विनिर्दि-
शेत्॥ तेषां द्राक्षा सरा स्वर्या मधुरा स्निग्धशीतला। रक्तपित्तज्वरश्वासतृष्णादाहक्षयापहा॥
हृद्या बृंहणी विबंधघ्नी पित्तास्रदाहनाशनी। केत्रपं रसायनं मेध्यं कामसमर्थं फलमुच्यते। ज्ञातव्या
पहं हृद्यं शीतलं तर्पणं गुरु। रसे पाके च मधुरं बल्यं रक्तपित्तजित्। बृंहणं पुंमहृद्यं च मधुक-
कुसुमं गुरु। वातपित्तोपशमनं फलं तस्योपदिश्यते। वातामाभिषुकाक्षोडनिकुलपिंडिनिको-
चमाणाद्यष्टीनि। पित्तश्लेष्महराण्याहुः। स्निग्धोष्णानि गुरूणि च। बृंहणान्यनिलघ्नानि बल्या-
नि मधुराणि च। कषायं कफपित्तघ्नं किंचिन्निम्बरुविप्रदं। हृद्यं सुगंधि विशदं लवली फलमु-
च्यते। बदरी तु शीतपाकं च सारं रूक्षं विबंधनं। विष्टंभि गुरु उष्णं शीतं रूक्षं वातप्रकोपनं। विपाके
मधुरं स्वादु रक्तपित्तप्रसादनं। शीतं कषायं मधुरं कं मारुतकृद्गुरु। स्निग्धोष्णं तिक्तमधु

४।
रंवातश्लेष्मकृत्पैत्तंहृत्।दामी।नेगुरुःस्वादुरुक्षोष्णं केशनाशनं।गुरुरुक्षोष्णातक
फलं कफघ्नं त्मधुरं हिमं।करीराख्यकपित्थुनिर्ग्राणाख्यल्प फलानि कस्वादु तिक्तक
कुष्ठानि कफवातहराणि च।तिक्तं पित्तकरं तेषां सरं कटुविपाकि च।तीक्ष्णोष्णं कटुकं पि
त्तसस्नेहं कफवातजित।आरुष्करं तौवरं कं कषायं कटुपाकि च।उष्णं कृमिज्वरानाह
मेहोदावर्त्तनाशनं।कुष्ठगुल्मोदरार्शोघ्नं कटुपाकि तथैव च।करंजकिंशुकारिष्टफलं
जंतुप्रमेहनुत्।रूक्षोष्णं कटुकं पाके लघु वातकफापहं।तिक्तमीषद्विषघ्नं हंति विडंगं कृमि
नाशनं।श्रेष्ठं गुल्मसरं मेध्यं दोषघ्नं तत्फलं कुष्ठनुत्।कषायं दीपनं बाल्यं बहुष्वं वामयाफलं
।भेदनं लघुरूक्षोष्णं वैस्वर्यकृमिनाशनं।बहुघ्नं स्वादुपाकाढ्यं कषायं कफपित्तजित्।कफ राम-
पित्तहरं रूक्षं त्वं बंधं च केशमलापहं।कषायमपि त्मधुरं किंचित्स्फूगफलं सरं।जातिकोशा

४ स्वादुःपाकरसानितिवापित्तनुत्तेषुकूष्मांडंबालंमध्यंकफावहं।वृद्धंलघु[illegible]सक्षारंदीपनंवस्ति
शोधनं।सर्वदोषहरंहृद्यंपथ्यंचेतोविकारिणाम्।दृष्टिशुक्रक्षयकरंकालिंदंकफवातकृत।अला
बुर्भिन्नविट्कागुरूरूक्षा।गुर्वतिशीतला।तिक्तालाबुरहृद्यापित्तविषामनीवातपित्तजित।त्रपुसंस्वादुरूक्षंकफी
